309sk18

# 18

# पर्यावरणस्य संरक्षणम्

भवान् जानाति एव यत् अद्यत्वे पर्यावरणस्य भीषणा समस्या वर्तते। वयं गृहस्य अवकरं नदीषु क्षिपामः; वस्त्राणि च फेनिलेन नदीषु, कूपेषु सरोवरेषु एव प्रक्षालयामः। औद्योगिकगैसैः अपि जलं प्रदुष्यते। किमधिकम् गंगायमुनेऽपि प्रदूषिते जाते। वयं तत् दूषितं जलमेव पिबामः रुग्णाः च भवामः। ध्वनिविस्तारकयन्त्रैः विशेषतः रात्रौ विभिन्नसमारोहेषु उच्चैः गीतानां कोलाहलेन ध्वनिप्रदूषणं जायते। औद्योगिकविकासेन वायुप्रदूषणमपि जातम्। एवमेव विचारप्रदूषणम् अपि सर्वत्र दृश्यते। अतोऽस्माभिः सदा पर्यावरणस्य संरक्षणं कर्तव्यम्। एतदर्थं अस्माभिः किं कर्तव्यम् इति विषये अस्मिन् पाठे वयं पठामः।

## उद्देश्यानि

इमं पाठं पठित्वा भवान्

- 'पर्यावरणम्' इति शब्दस्य अर्थं लेखितुं समर्थः भविष्यति;
- पर्यावरणस्य संरक्षणे अस्माभिः किं किं कर्तव्यम् इति लेखिष्यति;
- पर्यावरण–प्रदूषणस्य कारणानि वर्णयितुं सक्षमः भविष्यति;
- पंचविधानां मण्डलानां नामानि लेखितुं समर्थः भविष्यति;
- संस्कृतवाङ्मयात् पर्यावरणविषयकं सन्दर्भद्वयं लेखितुं शक्ष्यति;
- विसर्गसन्धेः उदाहरणानि चित्वा संन्धिं/सन्धिच्छेदं करिष्यति;
- 'द्वन्द्वसमासस्य विग्रहं विग्रहयुक्तपदानां च समसनं करिष्यति;
- अस्, ब्रू, हन्, कृ धातूनां रूपाणां प्रयोगं करिष्यति।

## क्रियाकलापः



18.1



18.2



18.3



18.4



18.5

उपरि चित्राणि दर्शितानि। तानि ध्यानेन दृष्ट्वा अधोलिखितानां प्रश्नानां शुद्धैः उत्तरैः सह मेलनं कुरुत–

| **प्रश्नाः** | **उत्तराणि** |
|---|---|
| (क) वाहनपदार्थैः सर्वत्र किं भवति? | (i) वस्त्राणि |
| (ख) द्वितीये चित्रे कस्य पर्वणः वर्णनम् अस्ति? | (ii) धूमम् |
| (ग) महिलाः किं क्षिपन्ति? | (iii) प्रदूषणम् |
| (घ) ध्वनिप्रदूषणेन वायुप्रदूषणेन च किं जायते? | (iv) अवकरम् |
| (ङ) रजकः नद्यां कानि क्षालयति? | (v) दीपावल्याः |
| (च) चलत् यानं किं त्यजति? | (vi) रोगः |







## 18.1 मूलपाठः

### पर्यावरणस्य संरक्षणम्

सम्प्रति मूलपाठं ध्यानेन पठामः

परितः आवृणोति सर्वान् अस्मान् यत् तत् पर्यावरणं कथ्यते। अद्यत्वे सर्वत्र पर्यावरणसंरक्षणस्य चिन्ता व्याप्नोति। स्वच्छं पर्यावरणं मानवजीवनाय अपेक्षितं भवति। प्रदूषितं पर्यावरणं विनाशाय कल्पते। अद्य प्रायः लोभैषणा वर्धते। मर्यादाः भज्यन्ते, नाद्रियते प्राकृतिकं जीवनम्।

वेदेषु पर्यावरणविषये सर्वत्र कल्याणकामना दृश्यते यथा–

शन्नोवातः पवतां शन्नः तपतु सूर्यः।
शन्नः कनिक्रद्देवः पर्जन्योऽभिवर्षतु।।

अथ पञ्चविधं पर्यावरणस्थानं–स्थलमण्डलम्, जलमण्डलम्, तेजोमण्डलम्, वायुमण्डलम्, नभोमण्डलम् च।

पर्यावरणस्य प्रथमं स्थानं भूमिः। पृथिव्यां ये पादपाः वीरुधो वनस्पतयो वा जायन्ते ते सर्वे क्षेमाय भवन्तु। यत्र तत्र निक्षिप्तानि प्लास्टिकवस्तूनि प्रदूषणं जनयन्ति। एतानि न क्षीयन्ते, न क्लिद्यन्ते, न वा नश्यन्ति अपितु वनस्पतीनां प्ररोहणे बाधां जनयन्ति।

भागवतपुराणेऽपि आदेशो दृश्यते यत् वृक्षाणां दहनं न करणीयम्–

मा द्रुमेभ्यो महाभागाः, दीनेभ्यो द्रोग्धुमर्हथ।

महाभारतेऽपि लिखितम् ''वनेन रक्ष्यते व्याघ्रः, व्याघ्रेण रक्ष्यते वनम्'' इति। अशोकस्य राज्ये एकोऽपि वृक्षः राजाज्ञां विना छेत्तुं न शक्यते स्म। संरक्षितानां पशूनां पक्षिणां च हननं दण्डार्हम् आसीत्।

**शब्दार्थाः**

संरक्षणम् = बचाव
आवृणोति = घेरता है
परितः = चारों ओर
व्याप्नोति = व्याप्त करता है
अपेक्षितम् = आवश्यक
अद्यत्वे = आजकल
कल्पते = समर्थ होता है
लोभैषणा = लालच की चाह
भज्यन्ते = टूट रही है
आद्रियते = आदर किया जाता है
शम् = कल्याणकारी
नः = हमारे लिए
वातः = वायु
पवताम् = बहे
कनिक्रद्देवः = बिजली के साथ गरजता हुआ देवता
पर्जन्यः = बादल
अभिवर्षतु = चारों ओर बरसे
वीरुधः = लहलहाती लताएँ
वनस्पतयः = वृक्ष
क्षेमाय = कल्याण के लिए
निक्षिप्तानि = फेंकी गई
जनयन्ति = पैदा करती है
न क्षीयन्ते = नष्ट नहीं होती है
न क्लिद्यन्ते = गीली नहीं होती
प्ररोहणे = उगने में
द्रुमेभ्यः = पेड़ों के लिए
मा द्रोग्धुम् अर्हथ = द्रोह नहीं करना चाहिए। व्याघ्रः = बाघ, रक्ष्यते = रक्षा की जाती है, राजाज्ञां विना = राजा की आज्ञा के बिना, छेत्तुं न शक्यते स्म = काटा नहीं जा सकता था, हननं = मारना, दण्डार्हम् = दण्डनीय

पर्यावरणस्य द्वितीयं तत्त्वं जलम् अस्ति। अद्यत्वे जलानि दूषितानि विषाणुसंसिक्तानि च दृश्यन्ते। अपि च दूषितजलपानेन स्वास्थ्यं नश्यति, नराः रुग्णाः भवन्ति पञ्चत्वं च यान्ति।

अन्तरिक्षमण्डले पर्यावरणस्य यत् तत्त्वं वर्तते तत् कथ्यते तेजोमण्डलम् यन्त्रागारेषु औद्योगिकक्षेत्रेषु कृत्यानि तान् रशिमसमूहान् उत्सृजन्ति यैर्मानवजीवनं क्षतिग्रस्तं जायते। परमाणुकेन्द्राद् उत्सृष्टः रश्मिपुञ्जः विनाशको भवति। अतः एतेभ्यः विकारेभ्यः तेजोमण्डलं सर्वथा रक्षणीयम्।

पर्यावरणस्य सर्वतः व्याप्तं प्रकृष्टं तत्त्वं वायुमण्डलम्। एतेन गन्धः प्रसरति। वायुः सर्वत्र पवित्रं वायुमण्डलं जीवनचक्रं च प्रेरयति। अद्यत्वे निर्माणशालाभ्यो निर्गतधूमैः वातावरणं विषाक्तं भवति। विषाक्तो वायुः अनेकान् रोगान् उत्पादयति।

टिप्पणी

विषाणुसंसिक्तानि = विषैले कृमियों से युक्त, दूषितजलपानेन = गंदा पानी पीने से, पञ्चतत्वम् = मृत्यु को यान्ति = प्राप्त होते हैं, यन्त्रागारेषु = कारखानों में, विद्युत्सम्बन्धेन = विजली के सम्पर्क से, धातु–योजक–वियोजक कृत्यानि = धातुओं को जोड़ने और अलग करने की प्रक्रियाएं, रश्मिसमूहान् = किरणों के समूह को, उत्सृजन्ति = उत्पन्न करते हैं, उत्सृष्टः = छोड़ा गया, विकारेभ्यः = दोषों से, प्रकृष्टम् = सर्वोत्कृष्ट, प्रसरति = फैलती है, प्रेरयति = प्रेरित करती है, निर्माणशालाभ्यः = कारखानों से निर्गतधूमैः = निकले हुए धुएं से विषाक्तं = विषैला, उत्पादयति = उत्पन्न करती है।, नभोमण्डलं = आकाशमण्डल, वाहनानि = गाड़ियां यन्त्रशालाः = कारखाने,



18.6

नभोमण्डलं पर्यावरणस्य पञ्चमं स्थानम्। वहनानि यन्त्रशालाः, ध्वनिविस्तारकाश्च उच्चैः ध्वनिमुत्पाद्य ध्वनिप्रदूषणं कुर्वन्ति। यत्र तत्र प्रदूषितो ध्वनिः बधिरत्वम् उत्पादयति। अन्तरिक्षे दशयोजनम् यावत् 'ओजोन' वायुमण्डलं परावृत्तम् इव आवर्तते। तस्मिन् ओजोनपटले साम्प्रतं विकिरणप्रभावेण दृश्यतेऽपक्षयः। यदि ओजोनपटलस्य रक्षा न क्रियते तदा क्षयकारिणः भयङ्कराः व्याधयः सम्भविष्यन्ति। अनुकूलपर्यावरणे जीवसृष्टिः वर्धते, प्रतिकूलपर्यावरणे च विनश्यति।

ध्वनिविस्तारकाः = लाउडस्पीकर उत्पाद्य = पैदा करके, बधिरत्वम् = बहिरापन, पराकृत्तम् इव = मानों वापस लौटा हुआ, साम्प्रतम् = अब विकिरणप्रभावेण = फैलाव के प्रभाव से, अपक्षयः = विनाश, हानि, क्षयकारिणः = विनाशकारी, व्याधयः = बीमारियों जीवसृष्टिः = प्राणिजगत् की रचना



18.7

यदि वयं पर्यावरणसंरक्षणे सावधानाः भवेम तदैव अस्माकं जीवनं शान्तिमयं सुखमयं च भवितुं शक्नोति। अस्माकं मानसिकविकृतिकारणात् अनेके रोगाः जायन्ते। मनसोऽशान्तिः बहुरोगान् जनयति, सामाजिकं वातावरणं च नाशयति। अतएव अस्माभिः मनः शुद्धं कर्तव्यम्। यदि मनः निर्मलं भविष्यति, तदैव अस्माकं विचाराः शुद्धाः, चिन्तनं शुद्धं भविष्यति येन पर्यावरणस्य विशुद्धिः अवश्यमेव भविष्यति। तदेव कारणं यत् ऋषयः सततं कामयन्ते स्म–

यतो यतः समीहसे, ततो नो अभयं कुरु।
शन्नः कुरु प्रजाभ्यः, अभयं नो पशुभ्यः।।

मानसिकविकृतिकारणात् = मानसिक बुराइयों/दोषों के कारण, मनसः = मन की, बहुरोगान् = अनेक रोगों को, जनयति = पैदा करती है, सततम् = निरन्तर, कामयन्ते = कामना करते हैं, यतःयतः = जहां जहां हो, समीहसे = इच्छा करते हो, ततः = वहां से, नः = हमें, अभयं कुरु = निडर बनाओ पशुभ्यः = पशुओं से, प्रजाभ्यः = प्रजा के लिए, शम् कुरु = कल्याण करो।

## 18.2 बोधप्रश्नाः

1. पाठं पठित्वा रिक्तस्थानानि पूरयत
   (क) ...................... पवित्रं वायुमण्डलं जीवनचक्रं च प्रेरयति।
   (ख) अद्यत्वे सर्वत्र .......................... चिन्ता व्याप्नोति।
   (ग) वेदेषु सर्वत्र पर्यावरणविषये ........................ दृश्यते।
   (घ) पर्यावरणस्य प्रथमं स्थानं .............................. ।
   (ङ) संरक्षितानां ............................ पक्षिणां च हननं .............. आसीत्।
2. 'क' स्तम्भस्यं वाक्यांशान् 'ख' स्तम्भस्य वाक्यांशैः सह मेलयत

| "क" स्तम्भः | "ख" स्तम्भः |
|---|---|
| (क) प्रदूषितं पर्यावरणम् | (i) ते क्षेमाय एव भवन्तु। |
| (ख) शन्नोवातः पवताम् | (ii) बधिरत्वम् उत्पादयति। |
| (ग) पृथिव्यां ये पादपाः वीरुधः | (iii) राजाज्ञां विना छेत्तुं न शक्यते स्म। |
| (घ) अशोकस्य राज्ये एकोऽपि वृक्षः | (iv) जीवनं सुखमयं भवितुं शक्नोति। |





(ङ) प्रदूषितो ध्वनिः (v) बहुरोगान् जनयति।
(च) मनसोऽशान्तिः एव (vi) विनाशाय कल्पते।
(छ) यदि वयं पर्यावरणसंरक्षणे सावधानाः भवेम (vii) वातावरणं विषाक्तं भवति।
(ज) अद्यत्वे निर्माणशालाभ्यः निर्गतधूमैः (viii) शन्नः तपतु सूर्यः।

3. पाठं पठित्वा पञ्चविधपर्यावरणस्थानानां नामानि लिखत
(क) ..........................................................................................................
(ख) ..........................................................................................................
(ग) ..........................................................................................................
(घ) ..........................................................................................................
(ङ) ..........................................................................................................

## 18.3 अधुना अवगच्छामः

### प्रथमः अंशः

इदानीम् प्रथमम् अंशं बोधामः।

**परितः आवृणोति .................................... द्रोग्धुमर्हथ।**

अद्यत्वे पर्यावरणसंरक्षणस्य चिन्ता सर्वत्र वर्तते। स्वच्छपर्यावरणं विना मानवजीवनं दुष्करम्। प्रदूषितं पर्यावरणं विनाशस्य कारणं भवति। वेदेषु वयं प्रकृष्टां पर्यावरणचेतनां पश्यामः। उदाहरणार्थम् अस्मिन् पाठांशे प्रदत्तं मन्त्रम् अवलोकयामः।

शन्नोवातः पवतां शन्नः तपतु सूर्यः।
शन्नः कनिक्रद्देवः पर्जन्योऽभिवर्षतु॥

**पदच्छेदः** शम् नः वातः पवताम् शम् नः तपतु सूर्यः।
शम् नः कनिक्रदत् देवः पर्जन्यः अभिवर्षतु॥

**अन्वयः** वातः नः शम् पवताम्। सूर्यः नः शम् तपतु। कनिक्रदत् देवः पर्जन्यः नः शम् अभिवर्षतु।

**भावार्थः**

वायवः अस्माकं कल्याणाय प्रवहन्तु। सूर्यः अस्माकं हिताय तपतु। विद्युता सह गर्जन् देवः पर्जन्यः अस्माकं क्षेमाय वर्षतु।

**व्याख्या**

प्रकृतिः प्रतिक्षणं मानवस्य हितसम्पादने निरता। पर्यावरणस्य संरक्षणाय प्रकृतिमानवयोः पारस्परिकं सन्तुलनम् अनिवार्यम्। प्रकृत्यां परिव्याप्तैः पञ्चमहाभूतैः एव मानवशरीरं विनिर्मितम्। शुद्धवायुं, स्वच्छं जलं, शुद्धां पृथिवीं विना मानवजीवनस्य कल्पना अपि कर्तुं न शक्यते। सहस्राणि वर्षाणि पूर्वं वैदिकऋषिभिः एतत् सत्यं सम्यक् अवगतम्। तैः प्राकृतिकतत्त्वानां देवतारूपेण स्तुतयः कृताः। तैः पर्यावरणस्य शुद्धये यज्ञसंस्थाविनिर्मिता। परन्तु सम्प्रति प्रकृतेः उपेक्षा क्रियते। मानवकल्याणाय प्रकृतेः पर्यावरणस्य सुरक्षा करणीया।

पर्यावरणस्थानं पञ्चविधम् उक्तम्– स्थलमण्डलम्, जलमण्डलम्, तेजोमण्डलम्, वायुमण्डलम् नभोमण्डलञ्च। पर्यावरणस्य प्रथमं स्थानं भूमिः पादपैः संरक्ष्यते। अतः अस्माकं प्राचीनग्रन्थेषु वृक्षसंरक्षणाय निर्देशाः सन्ति। वृक्षाः देववत् पूज्याः, पुत्रवत् पालनीयाः मन्यन्ते। परन्तु यत्र तत्र निक्षिप्तानि प्लास्टिकवस्तूनि पादपानां संवर्धने बाधकानि भवन्ति। अतः मानवैः वृक्षसंरक्षणाय पर्यावरणशुद्ध्यर्थं प्लास्टिकवस्तूनि यथासम्भवं निराकरणीयानि।

**सारः**

यत् अस्मान् परितः आवृणोति तत् पर्यावरणम् अद्यत्वे पर्यावरणसंरक्षणस्य चिन्ता सर्वत्र तीव्रा दृश्यते। वेदेषु पर्यावरणविषये सर्वत्र कल्याणकामना दृश्यते। मानवजीवनाय स्वच्छं शुद्धं च पर्यावरणम् अपेक्ष्यते। इतस्ततः निक्षिप्तानि प्लास्टिकवस्तूनि प्रदूषणं जनयन्ति। पर्यावरणस्थानं पञ्चविधम्। प्रथमं स्थानं तु स्थलमण्डलम् भूमिमण्डलम् वा। पादपाः मनुष्यस्य क्षेमाय भवन्तु। भागवतपुराणेऽपि आदिष्टम् यत् अस्माभिः वृक्षाः कदापि न दहनीयाः।

आजकल संसारभर में लोग पर्यावरण के विषय में चिन्ताग्रस्त हैं। पर्यावरण की शुद्धता के लिये तथा प्रदूषण रोकने के लिये सर्वत्र गोष्ठियां आयोजित की जा रही हैं। विचारप्रदूषण से ही वातावरण प्रदूषित होता है। आज लालच की भावना बढ़ रही है, प्राकृतिक जीवन का कोई आदर नहीं करता। हालांकि वेदों में सर्वत्र पर्यावरण संबंधी कल्याणकामना की गई है। वृक्षों से पर्यावरण की सुरक्षा सम्भव है इसीलिये भागवतपुराण में स्पष्ट आदेश है कि वृक्षों को कभी जलाना नहीं चाहिये। हमें प्लास्टिकवस्तुओं को इधर उधर फेंकना नहीं चाहिए ताकि पर्यावरण सुरक्षित रहे।

## व्याकरणबिन्दवः

**सन्धिच्छेदाः**

| | | | |
|---|---|---|---|
| नाद्रियते | = न + आद्रियते | अ + आ = आ | दीर्घसन्धिः |
| लोभैषणा | = लोभ + एषणा | अ + ए = ऐ | वृद्धिसन्धिः |





पर्जन्योऽभिवर्षतु = पर्जन्यः + अभिवर्षतु – उ     विसर्गसन्धिः (अ+इ = ओ)

आदेशोदृश्यते = आदेशः + दृश्यते – उ     विसर्गसन्धिः (अ+इ = ओ)

दीनेभ्यो द्रोग्धुम् = दीनेभ्यः + द्रोग्धुम् – उ     विसर्गसन्धिः (अ+इ = ओ)

**प्रकृतिप्रत्ययपरिचयः**

द्रोग्धुम् – √द्रुह् + तुमुन्, अव्ययम्

करणीयम् – √कृ + अनीयर्, नपुं., प्रथमाविभक्तिः, एकवचनम्।

पर्यावरणम् – परि + आ + √वृ + ल्युट्, नपुं., प्रथमाविभक्तिः, एकवचनम्।

संरक्षणम् – सम् + √रक्ष् + ल्युट्, नपुं., प्रथमाविभक्तिः, एकवचनम्।

निक्षिप्तानि – नि + √क्षिप् + क्त, नपुं., प्रथमाविभक्तिः, एकवचनम्।

प्रदूषितम् – प्र + √दुष् + णिच् + क्त, नपुं., प्रथमाविभक्तिः, एकवचनम्।

**परस्मैपद–क्रियापदानि**

आवृणोति – आ + √वृ + लट्, प्रथमपुरुषः, एकवचनम्

व्याप्नोति – वि + √आप् + लट्, प्रथमपुरुषः, एकवचनम्

नश्यन्ति – √नश्, लट्, प्रथमपुरुषः, एकवचनम्

अर्हथ – √अर्ह्, लट्, मध्यमपुरुषः, बहुवचनम्

अभिवर्षतु – अभि + √वृष्, लोट्, प्रथमपुरुषः, एकवचनम्

**आत्मनेपद–क्रियापदानि**

कथ्यते – √कथ् + कर्मवाच्य, लट्., प्रथमपुरुषः, एकवचनम्।

दृश्यते – √दृश् + कर्मवाच्य, लट्., प्रथमपुरुषः, एकवचनम्।

भज्यन्ते – √भञ्ज् + कर्मवाच्य, लट्., प्रथमपुरुषः, बहुवचनम्।

क्षीयन्ते – √क्षि + कर्मवाच्य, लट्., प्रथमपुरुषः, बहुवचनम्।

क्लिद्यन्ते – √क्लिद् + कर्मवाच्य, लट्., प्रथमपुरुषः, बहुवचनम्।

कल्पते – √क्लृप् + लट्., प्रथमपुरुषः, एकवचनम्।

वर्धते – √वृध् + लट्., प्रथमपुरुषः, एकवचनम्।

**अव्ययपदानि**

परितः – परितः अस्मान् सर्वान् आवृणोति तत् पर्यावरणम्।

अद्यत्वे, सर्वत्र – अद्यत्वे सर्वत्र पर्यावरणसंरक्षणस्य चिन्ता व्याप्नोति।

अद्य, प्रायः – अद्य प्रायः लोभैषणा वर्धते।

| | |
|---|---|
| यत्र, तत्र | – यत्र, तत्र निक्षिप्तानि प्लास्टिकवस्तूनि प्रदूषणं जनयन्ति। |
| अथ | – अथ पञ्चविधं पर्यावरणस्थानम्। |
| मा | – दीनेभ्यः द्रुमेभ्यः मा द्रोग्धुम् अर्हथ। |

## पाठगतप्रश्नाः 18.1

1. संस्कृतेन उत्तरत
   (क) परितः आवृणोति यत् अस्मान् तत् किं कथ्यते?
   (ख) वेदेषु पर्यावरणविषये का दृश्यते सर्वत्र?
   (ग) अद्य प्रायः विचारप्रदूषणाय का वर्धते?
   (घ) वनस्पतीनां प्ररोहणे कानि बाधां जनयन्ति?
   (ङ) भागवतपुराणे वृक्षविषये कः आदेशः अस्ति?
2. कर्तृपदानि चिनुत
   (क) पर्यावरणसंरक्षणस्य चिन्ता अस्मान् व्याप्नोति।
   (ख) एतानि प्ररोहणे बाधां जनयन्ति।
   (ग) वेदेषु कल्याणकामना दृश्यते।
   (घ) पृथिव्यां पादपाः क्षेमाय एव भवन्तु।
   (ङ) वृक्षाणां दहनं न करणीयम्।
3. रेखाङ्कितपदानि बहुवचने परिवर्तयत
   (क) अद्य लोभैषणा वर्धते।
   (ख) अद्यत्वे प्राकृतिकं जीवनं नाद्रियते।
   (ग) भागवतपुराणे आदेशः अस्ति यत् वृक्षस्य दहनं न करणीयम्।
   (घ) निक्षिप्तं प्लास्टिकवस्तु न नश्यति, न क्लिद्यते।
   (ङ) वेदे सर्वत्र कल्याणकामना अस्ति।

## द्वितीयः अंशः

**महाभारतेऽपि लिखितम् .......................................... रोगान् उत्पादयति।**

सम्प्रति द्वितीयम् अंशं सम्यक् अवबोधामः। अत्र महाभारतस्य कथनम्– ''वनेन रक्ष्यते व्याघ्रः व्याघ्रेण रक्ष्यते वनम्'' अत्यधिकं महत्त्वपूर्णम्। वनानाम् अभावे व्याघ्राणां संरक्षणं न भविष्यति। अतः ते असुरक्षिताः भविष्यन्ति। व्याघ्राः अपि वनानि रक्षन्ति यतः तेषां भयात् जनाः वनानां छेदनं कर्तुं न उत्सहन्ते। अत्र 'व्याघ्र' इति शब्देन न केवलं व्याघ्रः अभिप्रेतः





अपितु सम्पूर्णं पशु जगत् पक्षिजगत् च अभीष्टम्। वनानि, पशवः पक्षिणः च पर्यावरणस्य संतुलने सहायतां कुर्वन्ति। अत एव पुरा भारते अशोकस्य राज्ये राजाज्ञां विना वृक्षं छेत्तुं न शक्यते स्म। पशूनां पक्षिणां हननम् अपि दण्डार्हम् आसीत्। एकेन शिलालेखेन ज्ञायते यत् 2200 वर्षेभ्यः पूर्वमेव अशोकेन तत्कालीनाम् आवश्यकताम् अवगत्य पर्यावरणरक्षणविषयिणी आज्ञा दत्ता आसीत्। अस्याम् आज्ञायां न केवलं धार्मिकं सांस्कृतिकं च चिन्तनं दृश्यते, अपितु पर्यावरणसंरक्षणविषयिणी जागरूकता वैज्ञानिकी दृष्टिः च प्रतिबिम्बिता दृश्यते।

पर्यावरणस्य द्वितीयं तत्त्वं जलम् अस्ति। सम्प्रति न केवलं नदीनाम् एव जलम् अत्यधिकं प्रदूषितम् अपितु औद्योगिकसंयत्रेभ्यः निष्कासितप्रदूषकतत्त्वैः भूमिगतजलम् अपि प्रदूषितम्। प्रदूषितजलैः अनेके रोगाः भवन्ति।

अन्तरिक्षमण्डले विराजमानं तेजोमण्डलम् अपि औद्योगिकक्षेत्रेषु धातुयोजकवियोजककृत्येभ्यः निर्गतैः रश्मिसमूहैः, परमाणुकेन्द्रेभ्यः उत्सृष्टैः रश्मिपुञ्जैश्च प्रदूषितम्। तदपि सर्वथा रक्षणीयम्।

पर्यावरणस्य प्रकृष्टं तत्त्वं वायुमण्डलमपि निर्माणशालाभ्यः निर्गतैः धूमैः विषाक्तं जातम्। एतत् अपि अनेकान् रोगान् उत्पादयति।

**सारः**

महाभारते सत्यं लिखितम् "व्याघ्रेण वनं रक्ष्यते।" अशोकस्य राज्ये वृक्षकर्तनं पशुपक्षिवधः च दण्डनीयः अपराधः आसीत्। जलं पर्यावरणस्य द्वितीयं तत्त्वं वर्तते। दूषितजलंपानेन स्वास्थ्यं नश्यति। अन्तरिक्षमण्डले तेजोमण्डलं पर्यावरणस्य एकं तत्वम् अस्ति। पर्यावरणस्य प्रकृष्टं तत्वं वायुमण्डलम्। वायुः दूषितः न करणीयः यतः विषाक्तो वायुः अनेकान् रोगान् जनयति।

महाभारत में लिखा है कि वन से ही बाघ की रक्षा की जा सकती है। अशोक के राज्य में एक भी  पेड़ राजा के आज्ञा के बिना काटा नही जा सकता था। रक्षित पशुओं और पक्षियों का वध एक दण्डनीय अपराध था। पर्यावरण का दूसरा तत्व जल है। दूषित जल पीने से कई रोग फैलते है। अन्तरिक्ष में तेजोमण्डल पर्यावरण का तीसरा तत्त्व है। पर्यावरण का प्रकृष्ट तत्त्व वायुमण्डल है। विषाक्त वायु जल ही की भाँति अनेकों रोगों को पैदा करती है। अतः वायु धुएँ से रहित तथा विषाक्त पदार्थो से रहित हो जिससे पर्यावरण शुद्ध रह सके।

## व्याकरणबिन्दवः

**सन्धिच्छेदः**

दण्डार्हम् = दण्ड + अर्हम् = अ + अ = आ, दीर्घसन्धिः

अद्यत्वेऽपि = अद्यत्वे + अपि = ए + अ = ऽ, पूर्वरूपसन्धिः

यैर्मानवजीवनम् = यैः + मानवजीवनम् = :–र् , विसर्गसन्धिः

विषाक्तो वायुः = विषाक्तः + वायुः = :- र्,विसर्ग सन्धिः

| समस्तपदाानि | विग्रहाः | समासमास |
|---|---|---|
| 1 दूषितविषाणुसंसिक्तानि | दूषिताानि च विषाणुसंसिक्तानि च | द्वन्द्वः |
| 2 पशुपक्षिणाम् | पशूनां च पक्षिणां च | द्वन्द्वः |
| 3 यन्त्रागारोद्योगिकक्षेत्रेषु | यन्त्रागाारेषु च औद्योगिकक्षेत्रेषु च | द्वन्द्वः |
| 4 वायुमण्डलजीवनचक्रे | वायुमण्डलं च जीवनचक्रं च | द्वन्द्वः |

**प्रकृतिप्रत्ययपरिचयः**

छेत्तुम् – √छिद् + तुमुन्, अव्ययम्
हननम् – √हन् + ल्युट्, नपुं प्र ए व ।
लिखितम् – √लिख् + क्त, नपुं प्र ए व ।
ग्रस्तम् – √ग्रस् +क्त, नपुं प्र ए व ।
संसिक्तानि – सम् + √सिच् + क्त, नपुं प्र ए व ।
क्रियमाणानि – √कृ + कर्मवाच्य + शानच्, नपुं प्र ए व ।
उत्सृष्टः – उत् + √सृज् + क्त, नपुं प्र ए व ।
प्रकृष्टम् – प्र + √कृष् + क्त, नपुं प्र ए व ।
व्याप्तम् – वि + √आप् + क्त, नपुं प्र ए व ।

**क्रियापदानि**

यान्ति = √या + लट्, प्र.पु., ब.व.।
आसीत् = √अस् + लङ्, प्र.पु., ए.व.।
उत्सृजन्ति = उत् + √सृज् + लट्, प्र.पु., ब.व.।
प्रसरति = प्र + √सृ + लट्, प्र.पु., ए.व.।
प्रेरयति = प्र + √ईर् + णिच् + लट्, प्र.पु., ए.व.।
उत्पादयति = उत् + √पद् + णिच् + लट्, प्र.पु., ए.व.।
रक्ष्यते = √रक्ष् + कर्मवाच्य + लट्, , प्र.पु., ए.व.।
शक्यते = √शक् + कर्मवाच्य + लट्, , प्र.पु., ए.व.।
कथ्यते = √कथ् + कर्मवाच्य + लट्, , प्र.पु., ए.व.।

**अव्ययपदानि**

अपि – महाभारतेऽपि लिखितम्।
न, विना – राजाज्ञां विना वृक्षः छेत्तुं न शक्यते स्म।
अद्यत्वे – अद्यत्वे जलानि दूषितानि सन्ति।
अपि च – अपि च दूषितजलपानेन स्वास्थ्यं नश्यति।
अतः – अतः तेजोमण्डलं रक्षणीयम्।
सर्वतः – सर्वतः व्याप्तं तत्त्वं वायुमण्डलम्।





## पाठगतप्रश्नाः 18.2

1. मञ्जूषायाः अव्ययपदानि चित्वा रिक्तस्थानानि पूरयत

(क) ............................. पर्यावरणं सर्वत्र दूषितं क्रियते।

(ख) अस्माभिः तेजोमण्डलं विविधविकारेभ्यः ......................... रक्षणीयम्।

(ग) ओषजनं विना जीवाः न जायन्ते, ................ प्राणिनां स्वास्थ्यम् ............... नश्यति।

(घ) ........................... अस्माभिः मिलित्वा प्रदूषणसमस्यायाः निवारणं कर्तव्यम्।

**मञ्जूषा**

| अतः, सर्वथा, अपि, अद्यत्वे, अपि च |
|---|

2. कर्मवाच्यान्तवाक्यानां कर्तृवाच्ये परिवर्तनं कुरुत

| **कर्मवाच्यम्** | **कर्तृवाच्यम्** |
|---|---|
| (क) व्याघ्रेण वनं रक्ष्यते। | (i) .................................... रक्षति। |
| (ख) वेदेषु कल्याणकामना दृश्यते। | (ii) .................................... पश्यामः। |
| (ग) वृक्षाः छेत्तुं न शक्यन्ते स्म। | (iii) .................................... शक्नुवन्ति स्म। |
| (घ) धूमेन वातावरणेन विषाक्तं भूयते। | (iv) ........................................................ । |

## तृतीयः अंशः

**नभो मण्डलं ........................................................ अभयं नो पशुभ्यः।**

**व्याख्या**

तृतीयांशे वर्णितं यत् पर्यावरणस्य पञ्चमं स्थानं नभोमण्डलम्। भवन्तः जानन्ति यत् वातावरणे विभिन्नाः ध्वनयः व्याप्ताः भवन्ति। तीव्राः कर्कशाः च ध्वनयः पर्यावरणं प्रदूषयन्ति। अद्यत्वे पर्यावरणविशेषज्ञानां ध्यानं ध्वनिप्रदूषणं प्रति आकृष्टम्। ध्वनिप्रदूषणस्य दुष्प्रभावेन चिन्तनक्षमता क्षयमाप्नोति। कर्णेन्द्रियविकारेण जनाः बधिराः भवन्ति। साम्प्रतं पर्यावरणप्रदूषणेन 'ओजोन–पटले' अपक्षयः सर्वेषां चिन्तायाः विषयः सञ्जातः। पर्यावरणरक्षणेन जीवनं शान्तं सुखमयं च भवति। मनसः अशान्तिः न केवलम् अनेकान् रोगान् जनयति अपितु सामाजिकपर्यावरणम् अपि प्रदूषयति। अतः सर्वविधपर्यावरणविशुद्धये मानसिकं पर्यावरणप्रदूषणं दूरीकरणीयम्। अत एव ऋषिभिः कथितम्–

"यतो यतः समीहसे, ततो नो अभयं कुरु।
शन्नः कुरु प्रजाभ्यः, अभयं नो पशुभ्यः।।"

**पदच्छेदः** यतः यतः समीहसे, ततः नः अभयम् कुरु।
शम् नः कुरु प्रजाभ्यः, अभयम् नः पशुभ्यः।।

**अन्वयः** यतः यतः समीहसे ततः नः अभयम् कुरु। नः प्रजाभ्यः शम् कुरु न पशुभ्यः अभयम् कुरु।

**भावार्थ**

अत्र ऋषिः प्रार्थयति यत् सर्वत्र शान्तिमयः वातावरणं भवेत्, कुतः अपि आशंका भयं वा न स्यात्। सर्वप्राणिनां कल्याणं भवेत्।

**सारः**

नभोमण्डलम् पर्यावरणस्य पञ्चमं स्थानम्। वाहनानि, यन्त्रशालाः, ध्वनिविस्तारकाः च उच्चैः ध्वनिम् उत्पाद्य ध्वनिप्रदूषणं कुर्वन्ति येन बधिरत्वम् उत्पाद्यते। ओजोनपटले विकिरणप्रभावेण अधुना अपक्षयः दृश्यते। यदि अस्य रक्षा न क्रियते तदा भयंकराः व्याधयः सम्भविष्यन्ति। यदि वयं पर्यावरणरक्षणे सावधानाः भवेम, तदा जीवनं शान्तिमयं भवेत्। अतः ऋषयः प्रजाभ्यः पशुभ्यः च अभयं कल्याणं च कामयन्ते।

आकाशमण्डल पर्यावरण का पांचवां स्थान है। प्रदूषित ध्वनि वाहनों, यन्त्रशालाओं और ध्वनिविस्तारकों से पैदा होती है तथा वह बहिरापन उत्पन्न करती है। यदि ओजोन पटल की रक्षा नहीं की जाती है तब भयंकर बीमारियां उत्पन्न हो जायेंगी। मन की अशान्ति बहुत से रोगों को पैदा करती है इसीलिए हमारे ऋषिगण समस्त प्राणियों के लिए अभय की कामना करते हैं।

## व्याकरणबिन्दवः

### सन्धिच्छेदाः

तदैव = तदा + एव, आ + ए – ऐ, वृद्धिसन्धिः

मनसोऽशान्तिः = मनसः + अशान्ति = :– उ, विसर्गसंधिः

दृश्यतेऽपक्षयः = दृश्यते + अपक्षयः ए + अ = ऽ, पूर्वरूपसन्धिः

| **समस्तपदानि** | **विग्रहः** | **समासनाम** |
|---|---|---|
| शान्तिमयसुखमये | शान्तिमयं च सुखमयं च | द्वन्द्वः |
| शुद्धमनः | शुद्धं मनः | कर्मधारयः |
| अभयम् | न भयम् | नञ् तत्पुरुषः |
| बहुरोगान् | बहवः रोगाः तान् | कर्मधारयः |

**प्रकृतिप्रत्ययपरिचयः**

सृष्टिः – √सृज् + क्तिन्

शान्तिमयं – शान्ति + मयट् नपु., प्रथमा एकवचनम्

विशुद्धिः – वि + √शुध् + क्तिन्





चिन्तनम् – √चिन्त् + ल्युट्
शान्तिः – √शम् + क्तिन्
कर्तव्यम् – √कृ + तव्यत्

**क्रियापदानि**

| | |
|---|---|
| सम्भविष्यन्ति | सम् + √भू + लृट्, प्रथमपुरुषः, बहुवचनम्। |
| विनश्यन्ति | वि + √नश् + लट्, प्रथमपुरुषः, बहुवचनम्। |
| कामयन्ते | √काम् + लट्, प्रथमपुरुषः, बहुवचनम्। |
| वर्धते | √वृध् + लट्, प्रथमपुरुषः, एकवचनम्। |
| आवर्तते | आ + √वृत्+ लट्, प्रथमपुरुषः, एकवचनम्। |

## धातुरूपाणि

**'अस्' धातुः (परस्मैपदी) अदादिगणतः**

| | लट् लकारः | | | लृट् लकारः | | |
|---|---|---|---|---|---|---|
| | **ए. व.** | **द्वि. व.** | **ब. व.** | **ए. व.** | **द्वि. व.** | **ब. व.** |
| **प्र० पु०** | अस्ति | स्तः | सन्ति | भविष्यति | भविष्यतः | भविष्यन्ति |
| **म० पु०** | असि | स्थः | स्थ | भविष्यसि | भविष्यथः | भविष्यथ |
| **उ० पु०** | अस्मि | स्वः | स्मः | भविष्यामि | भविष्यावः | भविष्यामः |
| | **लङ् लकारः** | | | **लोट् लकारः** | | |
| **प्र० पु०** | आसीत् | आस्ताम् | आसन् | अस्तु | स्ताम् | सन्तु |
| **म० पु०** | आसीः | आस्तम् | आस्त | एधि | स्तम् | स्त |
| **उ० पु०** | आसम् | आस्व | आस्म | असानि | असाव | असाम |

**विधिलिङ्**

| | | | |
|---|---|---|---|
| **प्र० पु०** | स्यात् | स्याताम् | स्युः |
| **म० पु०** | स्याः | स्यातम् | स्यात |
| **उ० पु०** | स्याम् | स्याव | स्याम |

**ब्रू –(अदादिगणतः) उभयपदी**

**परस्मैपदे**

| | लट् लकारः | | | लृट् लकारः | | |
|---|---|---|---|---|---|---|
| | **ए. व.** | **द्वि. व.** | **ब. व.** | **ए. व.** | **द्वि. व.** | **ब. व.** |
| **प्र० पु०** | ब्रवीति, | ब्रूतः, | ब्रुवन्ति, | वक्ष्यति | वक्ष्यतः | वक्ष्यन्ति |
| **म० पु०** | ब्रवीषि, | ब्रूथः, | ब्रूथ | वक्ष्यसि | वक्ष्यथः | वक्ष्यथ |
| **उ० पु०** | ब्रवीमि | ब्रूवः | ब्रूमः | वक्ष्यामि | वक्ष्यावः | वक्ष्यामः |
| | **लङ्लकारः** | | | **लोट् लकारः** | | |
| **प्र० पु०** | अब्रवीत् | अब्रूताम् | अब्रूवन् | ब्रवीतु | ब्रूताम् | ब्रुवन्तु |
| **म० पु०** | अब्रवीः | अब्रूतम् | अब्रूत | ब्रूहि | ब्रूतम् | ब्रूत |
| **उ० पु०** | अब्रवम् | अब्रूव | अब्रूम | ब्रवाणि | ब्रवाव | ब्रवाम |

**विधिलिङ्**

| | | | |
|---|---|---|---|
| **प्र० पु०** | ब्रूयात् | ब्रूयाताम् | ब्रूयुः |
| **म० पु०** | ब्रूयाः | ब्रूयातम् | ब्रूयात |
| **उ० पु०** | ब्रूयाम् | ब्रूयाव | ब्रूयाम |

### हन् (अदादिगणतः) परस्मैपदी

| | लट्लकारः | | | लृट्लकारः | | |
|---|---|---|---|---|---|---|
| | ए. व. | द्वि. व. | ब. व. | ए. व. | द्वि. व. | ब. व. |
| प्र0 पु0 | हन्ति | हतः | ध्नन्ति | हनिष्यति | हनिष्यतः | हनिष्यन्ति |
| म0 पु0 | हंसि | हथः | हथ | हनिष्यसि | हनिष्यथः | हनिष्यथ |
| उ0 पु0 | हन्मि | हन्वः | हन्मः | हनिष्यामि | हनिष्यावः | हनिष्यामः |
| | लङ्लकारः | | | लोट्लकारः | | |
| प्र0 पु0 | अहन् | अहताम् | अघ्नन् | हन्तु | हताम् | घ्नन्तु |
| म0 पु0 | अहनः | अहतम् | अहत | जहि | हतम् | हत |
| उ0 पु0 | अहनम् | अहन्व | अहन्म | हनानि | हनाव | हनाम |

**विधिलिङ्**

| | | | |
|---|---|---|---|
| प्र0 पु0 | हन्यात् | हन्याताम् | हन्युः |
| म0 पु0 | हन्याः | हन्यातम् | हन्यात |
| उ0 पु0 | हन्याम् | हन्याव | हन्याम |

### कृ (तनादिगणतः) उभयपदी

**परस्मैपदे**

| | लट्लकारः | | | लृट्लकारः | | |
|---|---|---|---|---|---|---|
| | ए. व. | द्वि. व. | ब. व. | ए. व. | द्वि. व. | ब. व. |
| प्र0 पु0 | करोति | कुरुतः | कुर्वन्ति | करिष्यति | करिष्यतः | करिष्यन्ति |
| म0 पु0 | करोषि | कुरुथः | कुरुथ | करिष्यसि | करिष्यथः | करिष्यथ |
| उ0 पु0 | करोमि | कुर्वः | कुर्मः | करिष्यामि | करिष्यावः | करिष्यामः |
| | लङ्लकारः | | | लोट्लकारः | | |
| प्र0 पु0 | अकरोत् | अकुरुताम् | अकुर्वन् | करोतु | कुरुताम् | कुर्वन्तु |
| म0 पु0 | अकरोः | अकुरुतम् | अकुरत | कुरु | कुरुतम् | कुरुत |
| उ0 पु0 | अकरवम् | अकुर्व | अकुर्म | करवाणि | करवाव | करवाम |

**विधिलिङ्**

| | | | |
|---|---|---|---|
| प्र0 पु0 | कुर्यात् | कुर्याताम् | कुर्युः |
| म0 पु0 | कुर्याः | कुर्यातम् | कुर्यात |
| उ0 पु0 | कुर्याम् | कुर्याव | कुर्याम |

## पाठगतप्रश्नाः 18.3

1. प्रश्नानाम् उत्तराणि लिखत

(क) कानि ध्वनिप्रदूषणं कुर्वन्ति?

(ख) विकिरणप्रभावेण ओजोनपटले साम्प्रतं किम् दृश्यते?

(ग) अस्माकं जीवनं सुखमयं कथं भवितुं शक्नोति?

(घ) मनसः अशान्तिः कं नाशयति?

(ङ) ऋषयः प्रजाभ्यः पशुभ्यः किं कामयन्ते।

2. एकवचने क्रियापदानि परिवर्तयत

(क) सम्भविष्यन्ति ............................................ ।

(ख) शक्नुवन्ति ............................................ ।

(ग) कामयन्ते ............................................ ।

(घ) कुर्वन्ति ............................................ ।

(ङ) आवर्तन्ते ............................................ ।

3. वाक्येषु क्रियापदानि कर्तृपदानि च चिनुत

(क) ध्वनिविस्तारकाः ध्वनिप्रदूषणं कुर्वन्ति।

(ख) 'ओजोन' वायुमण्डलं परावृत्तम् आवर्तते।

(ग) अनुकूलपर्यावरणे जीवनसृष्टिः वर्धते।

(घ) मनसः अशान्तिः बहुरोगान् जनयति।

(ङ) अस्माकं ऋषयः प्रजाभ्यः अभयं कामयन्ते।

## 18.4 किम् अधिगतम्

- पर्यावरणस्य समस्या चिन्तनीया अस्ति।
- पर्यावरणस्थानस्य पञ्चविधानि नामानि।
- अस्माभिः वृक्षदहनं न कर्तव्यम्, प्लास्टिकवस्तूनां प्रयोगः न कर्तव्यः यतः तानि प्रदूषणं जनयन्ति।
- वाहनानि, ध्वनिविस्तारकयन्त्राणि ध्वनिप्रदूषणं कुर्वन्ति। पशूनां पक्षिणां च संरक्षणम् आवश्यकम्, वृक्षकर्तनं न कर्तव्यम्, दूषितं जलं न पातव्यम्।

## 18.5 योग्यताविस्तारः

**भावविस्तारः**

भारतदेशे 2200 वर्षेभ्यः पूर्वम् एव पर्यावरणस्य जागरूकता आसीत् इति नूनं विस्मयावहम्। यस्य पर्यावरणस्य विषये अद्य वयं बहु चिन्तिताः स्मः तस्य पर्यावरणस्य संरक्षणस्य चिन्ता

अशोकस्य राज्येऽपि आसीत्। अस्य प्रमाणाः सन्ति तत्कालीनाः उपलब्धाः शिलालेखाः। ततः तु पर्यावरणस्य ईदृशी समस्या नासीत् यतः अस्माकं पर्यावरणं प्रकृतेः विविधोपादानैः पूर्णमासीत्। समस्तानि प्राकृतिकतत्त्वानि देवताः एव मन्यन्ते स्म।

अतः यजुर्वेदे उक्तम्–

अग्निर्देवता वातोदेवता सूर्योदेवता ..... वरूणो देवता।।

ओउम् देव सवितः प्रसुव यज्ञं प्रसुव यज्ञपतिं भगाया

दिव्यो गन्धर्वः केतपूः केतं न पुनातु वाचस्पतिर्वीचं नः स्वदतु। यजु. 30/1।

स्थलम्– पृथिवी अस्माकं माता अतः नमस्करणीया वर्तते कथितं हि–
माता भूमिः पुत्रोऽहं पृथिव्याः। अथर्ववेद 12/1/12।

जलम्– (आपः) शंनो देवीरभिष्टये आपो भवन्तु पीतये। यजु. 36/12।

तेजः– अग्निमीडे पुरोहितं, यज्ञस्य देवमृत्विजम्।
होतारं रत्नदाधतम्। ऋग्वेद 1/1/1।

वायुः– ओउम् शन्नो वातः पवतां शंन्नस्तपतु सूर्यः। यजु. 36/10।

नभः– शं न सुरुचिः भवतु स्वधाभिः। शं रोदसी बृहती शं नो अद्रिः।
शं नो देवानां सुहतानि सन्तु । नाहक् 7/35/3

सर्वत्र शान्तिः भवेत्। क्वचिदपि विचारप्रदूषणं न स्यात्। अतः यजुर्वेदे इत्थं प्रार्थितम्–

ओउम् द्यौः शान्तिरन्तरिक्षं शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः। वनस्पतयः शान्तिर्विश्वे देवाः शान्तिर्ब्रह्म शान्तिः सर्वं शान्तिः शान्तिरेव सा मा शान्तिरेधि।

पर्यावरणसंरक्षणाय एतादृशी शान्तिः सर्वत्र अपेक्षिता।

**भाषिककार्यम्**

**चुरादिगणधातवः (लट्)**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः पुरुषः | चोरयति | चिन्तयतः | ताडयन्ति |
| मध्यमः पुरुषः | भक्षयसि | गणयथः | पूजयथ |
| उत्तमः पुरुषः | कथयामि | चोरयावः | चिन्तयामः |

**इकारान्त पुल्लिङ्गः**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | मुनिः | मुनी | मुनयः |
| द्वितीया | ऋषिम् | ऋषी | ऋषीन् |
| तृतीया | हरिणा | हरिभ्याम् | हरिभिः |
| चतुर्थी | मुनये | मुनिभ्याम् | मुनिभ्यः |
| पंचमी | उदधेः | उदधिभ्याम् | उदधिभ्यः |
| षष्ठी | व्याधेः | व्याध्योः | व्याधीनाम् |
| सप्तमी | रवौ | रव्योः | रवीषु |
| सम्बोधन | हे कपे | हे कपी | हे कपयः |





**इकारान्त स्त्रीलिङ्गः**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | मतिः | मती | मतयः |
| द्वितीया | जातिम् | जाती | जातीः |
| तृतीया | स्थित्या | स्थितिभ्याम् | स्थितिभिः |
| चतुर्थी | बुद्धये | बुद्धिभ्याम् | बुद्धिभ्यः |
| पंचमी | नीतेः | नीतिभ्याम् | नीतिभ्यः |
| षष्ठी | तिथेः | तिथ्योः | तिथीनाम् |
| सप्तमी | भूमौ | भूम्योः | भूमिषु |
| सम्बोधन | हे मते | हे मती | हे मतयः |

## 18.6 पाठान्तप्रश्नाः

1. रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत

   (क) मानवजीवनाय स्वच्छं पर्यावरणम् अपेक्षितं भवति।

   (ख) भागवतपुराणे द्रुमाः दीनाः कथिताः।

   (ग) महाभारते वनविषये लिखितम् यत् वनेन व्याघ्रः रक्ष्यते।

   (घ) अद्यत्वे निर्माणशालाभ्यः निर्गतधूमैः वातावरणं विषाक्तं भवति।

   (ङ) तेजोमण्डलं विकारेभ्यः रक्षणीयम्।

   (च) यदि वयं पर्यावरणसंरक्षणे सावधानाः भवेम, अस्माकं जीवनं सुखमयं शान्तिमयं च भवेत्

2. कथनानां समुचितमेलनं कुरुत

| | |
|---|---|
| (क) नाद्रियते अद्यत्वे | (i) विकिरणप्रभावेण अपक्षयः दृश्यते। |
| (ख) भूमिः मण्डलानां | (ii) ततो नो अभयं कुरु। |
| (ग) औद्योगिकक्षेत्रकारणात् | (iii) प्रथमं तत्वं वर्तते। |
| (घ) ओजोनपटले साम्प्रतं | (iv) प्राकृतिकं जीवनम्। |
| (ङ) यतो यतः समीहसे | (v) मानवजीवनं क्षतिग्रस्तं जायते। |

3. समस्तपदानां विग्रहं कृत्वा समासनाम अपि लिखत'

   (क) पशुपक्षिणाम्

   (ख) यन्त्रागारौद्योगिकक्षेत्राणि

   (ग) निर्गतधूमैः

   (घ) पादपवीरुधवृक्षाः

(ङ) पर्यावरणसंरक्षणे

(च) अभयम्

4. निर्देशानुसारम् उपयुक्तैः धातुरूपैः रिक्त स्थानानि पूरयत

(i) मम गृहे शतं पुस्तकानि ........................ । (अस्, लट्लकारः)

(ii) लोचनाभ्यां विहीनस्य दर्पणः किं .................... । (कृ लृट्लकारः)

(iii) पुरा शूद्रको नाम राजा .................... । (अस् लङ्लकारः)

(iv) सः माणवकं धर्मं .................... । (ब्रू लट्लकारः)

(v) त्वं सत्यं .................... । (ब्रू लोट्लकारः)

(vi) दुर्जने दयां मा .................... । (कृ लोट्लकारः)

(vii) अहम् अक्षराणाम् अकारः .................... । (अस् लट्लकारः)

(viii) सः चर्मणि गजं .................... । (हन् लट्लकारः)

(ix) त्वं साधूनां सेवां .................... । (कृ विधिलिङ्लकारः)

(x) सत्यं ................ प्रियं .................... । (ब्रू विधिलिङ्लकारः)

(xi) त्वं संग्रामे शत्रून् .................... । (हन् लोट्लकारः)

(xii) अहं कमपि जीवं न .................... । (हन् विधिलिङलकारः)

5. 'पर्यावरणस्य संरक्षणम्' विषयम् अधिकृत्य षड्वाक्यानि रचयत।

## 18.7 उत्तराणि

**18.3 बोधप्रश्नाः**

1. (क) सर्वतः (ख) पर्यावरणसंरक्षणस्य (ग) कल्याणकामना (घ) भूमिः (ङ) पशूनाम्, दण्डार्हम्।
2. (क) vi, (ख) viii, (ग) i, (घ) iii, (ङ) ii, (च) v, (छ) iv, (ज) vii
3. (क) स्थलमण्डलम् (ख) जलमण्डलम् (ग) तेजोमण्डलम् (घ) वायुमण्डलम् (ङ) नभोमण्डलम्

**पाठगतप्रश्नाः**

**18.1** 1. (क) तत् पर्यावरणं कथ्यते।

(ख) वेदेषु सर्वत्र कल्याणकामना दृश्यते।

(ग) अद्य प्रायः विचारप्रदूषणाय लोभैषणा वर्धते।

(घ) निक्षिप्तानि प्लास्टिकवस्तूनि वनस्पतीनां प्ररोहणे बाधां जनयन्ति।

(ङ) भागवतपुराणे आदेशः अस्ति यत् वृक्षाणां दहनं न करणीयम्।

2. (क) चिन्ता, (ख) एतानि, (ग) कल्याणकामना, (घ) पादपाः, (ङ) दहनम्।

3. (क) लोभैषणाः वर्धन्ते। (ख) प्राकृतिकानि जीवनानि न आद्रियन्ते।
(ग) वृक्षाणाम्। (घ) निक्षिप्तानि प्लास्टिकवस्तूनि, नश्यन्ति, क्लिद्यन्ते।
(ङ) वेदेषु कल्याणकामनाः सन्ति।

**18.2** 1. (क) अद्यत्वे, (ख) सर्वथा, (ग) अति च, अपि, (घ) अतः

2. (क) व्याघ्रः वनं रक्षति।

(ख) वेदेषु कल्याणकामनां पश्यामः।

(ग) वृक्षान् छेत्तुं न शक्नुवन्ति स्म।

(घ) धूमेन वातावरणं विषाक्तं भवति।

**18.3** 1. (क) यन्त्रशालाः, ध्वनिविस्तारकाः वाहनानि च ध्वनिप्रदूषणं कुर्वन्ति।

(ख) विकिरणप्रभावेण ओजोनपटले साम्प्रतम् अपक्षयः दृश्यते।

(ग) अस्माकं जीवनं तदैव सुखमयं भवितुं शक्नोति यदा वयं पर्यावरणसंरक्षणे सावधानाः भवेम।

(घ) मनसः अशान्तिः सामाजिकं वातावरणं नाशयति।

(ङ) ऋषयः प्रजाभ्यः पशुभ्यः च अभयं कामयन्ते।

2. (क) सम्भविष्यन्ति (ख) शक्नोति (ग) कामयते (घ) करोति (ङ) आवर्तते।

3.

| | कर्तृपदानि | क्रियापदानि |
|---|---|---|
| (क) | ध्वनिविस्तारकाः | कुर्वन्ति |
| (ख) | वायुमण्डलम् | आवर्तते |
| (ग) | जीवसृष्टिः | वर्धते |
| (घ) | अशान्तिः | जनयति |
| (ङ) | ऋषिः | कामयते |

**18.6 पाठान्तप्रश्नाः**

1. (क) मानवजीवनाय किम् अपेक्षितं भवति?

(ख) भागवतपुराणे द्रुमाः कीदृशाः कथिताः?

(ग) महाभारते वनविषये किं लिखितम्?

(घ) अद्यत्वे निर्माणशालाभ्यः निर्गतधूमैः वातावरणम् कीदृशं भवति?

(ङ) तेजोमण्डलं केभ्यः रक्षणीयम्?

(च) अस्माकं जीवनं कथं सुखमयं शान्तिमयं च भवितुं शक्नोति?

2. कथनानां समुचितमेलनम्

(क) नाद्रियते अद्यत्वे प्राकृतिकं जीवनम्।

(ख) भूमिः मण्डलानां प्रथमं तत्त्वं वर्तते।

(ग) औद्योगिकक्षेत्रकारणात् मानवजीवनं क्षतिग्रस्तं जायते।

(घ) ओजोनपटले साम्प्रतं विकिरणप्रभावेण अपक्षयः दृश्यते।

(ङ) यतो यतः सीमहसे, ततो नो अभयं कुरु।

3. (क) पशवः च पक्षिणः च, तेषाम् द्वन्द्वः

(ख) यन्त्रागाराः च औद्योगिकक्षेत्राणि च, द्वन्द्वः

(ग) निर्गताः धूमाः तैः (कर्मधारयः)

(घ) पादपाः च वीरूधः च वृक्षाः च, द्वन्द्वः

(ङ) पर्यावरणस्य संरक्षणम् तस्मिन् (ष. त.)

(च) न भयम् नञ् तत्पुरुषः

4. (i) सन्ति। (ii) करिष्यति। (iii) आसीत्। (iv) ब्रवीति अथवा ब्रूते। (v) ब्रूहि। (vi) कुरु। (vii) अस्मि। (viii) हन्ति। (ix) कुर्याः। (x) ब्रूयात्। (xi) जहि। (xii) हन्याम्।

5. 'पर्यावरणस्य संरक्षणम्' विषये स्वेच्छया षड्वाक्यानि लेख्यानि।